श्रुतबोधम्

# Śrutabodha

by

# Śrīmat Kālidāsa

(देवनागरी अक्षरा)

edited by
**Vāsudev Laxmaṇ Shāstrī Paṇśīkar**
(Bombay, 1906)

## A Note on this Edition

What follows is a transliteration of the text of Śrutabodha as it appears in the edition by Paṇśīkar, which was published in Bombay in 1906[1]. The text is found alongside the same editor's edition of Śrī Kedārabhaṭṭa's Vṛttaratnākara, the main work in the book, and Śrī Gaṅgādāsa's Chandomañjarī.

39 of the main metres in use in Sanskrit verse compositions are described in this work,[2] and it therefore acts as a handy reference work for anyone with an interest in the subject. Other works on prosody, like Śrī Piṃgala's Chandaḥśāstra, and Śrī Kedārabhaṭṭa's Vṛttaratnākara, provide a more comprehensive list that include metres that are found only occasionally in the literature.

For reference in this edition I have added in the metrical markings (⏑ = a light syllable; and – a heavy syllable).

Ānandajoti Bhikkhu
2003/2547

---

1 Śrutabodha in this edition is attributed to Śrī Kālidāsa, but according to Monier-Williams (SED), it is elsewhere attributed to Śrī Vararuci, so that it's exact authorship appears to be uncertain.

2 These are also the main metres found in classical Pāḷi verse texts.

# श्रुतबोध

–◡––¦◡–––¦¦◡◡––¦◡–◡–   श्लोक

चन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते।

◡◡––¦◡–––¦¦◡◡–◡¦◡–◡–

तमहं संप्रवक्ष्यामि श्रुतबोधमविस्तरम्॥ १॥

––¦––¦––¦¦––¦––¦◡–◡¦––¦–   आर्या

संयुक्ताद्यं दीर्घं सानुस्वारं ऽसंमिश्रम्।

––¦◡–◡¦–◡◡¦¦––¦––¦◡¦––¦–

विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन॥ २॥

–◡––¦◡–––¦¦◡–––¦◡–◡–   श्लोक

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।

◡–––¦◡–––¦¦–◡––¦◡–◡–

त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्॥ ३॥

# मात्राचन्दस्

### आर्या ३० + २७ मात्रा

––¦––¦⏑⏑–¦¦–⏑⏑¦––¦⏑–⏑¦––¦–
यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीये ऽपि।
––¦⏑–⏑¦––¦¦⏑–⏑¦––¦⏑¦⏑⏑–¦–
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या॥ ४॥

### गीति ३० + ३० मात्रा

––¦––¦⏑⏑–¦¦⏑–⏑¦⏑⏑⏑⏑¦⏑–⏑¦–⏑⏑¦–
आर्यापूर्वार्धसमं द्वितीयमपि भवति यत्र हंसगते।
––¦⏑–⏑¦––¦¦––¦–⏑⏑¦⏑–⏑¦––¦–
चन्दोविदस्तदानीं गीतिंताममृतवाणि भाषन्ते॥ ५॥

### उपगीति २७ + २७ मात्रा

––¦⏑–⏑¦––¦¦⏑⏑–¦⏑⏑–¦⏑¦––¦–
आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत्।
–⏑⏑¦–⏑⏑¦––¦¦⏑⏑–¦––¦⏑¦–⏑⏑¦–
कामिनि तामुपगीतिं प्रतिभाषन्ते महाकवयः॥ ६॥

# अक्षरच्चन्दस्

## पाङ्क्ति ५ अक्षरा

–⏑⏑––,

आद्यचतुर्थं
पञ्चमकं चेत्।
यत्र गुरु स्यात्
साक्षरपङ्क्तिः॥ ७॥

## शशिवदना ६ अक्षरा

⏑⏑⏑⏑––,

अगुरुचतुष्कं
भवति गुरू द्वौ।
घनकुचयुग्मे
शशिवदनासौ॥ ८॥

## मदलेखा ७ अक्षरा

–––⏑⏑––,

तूर्यं पञ्चमकं चेद्
यत्र स्याल्लघु बाले।
विद्वद्भिर्मृगनेत्रे
प्रोक्ता सा मदलेखा॥ ९॥

### श्लोक ८ + ८ अक्षरा

––––¦⏑–––¦¦––⏑⏑¦⏑–⏑–

श्लोके षष्ठं गुरु ज्ञेयंसर्वत्र लघु पञ्चमम्।

⏑⏑––¦⏑–––¦¦–⏑––¦⏑–⏑–

द्विचतुःपादयोर्ह्रस्वंसप्तमं दीर्घमन्ययोः॥ १०॥

–⏑–⏑¦⏑–––¦¦–⏑–⏑¦⏑–⏑–

पञ्चमं लघु सर्वत्रसप्तमं द्विचतुर्थयोः।

––⏑⏑¦⏑–––¦¦––––¦⏑–⏑–

षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम्॥ ११॥

### माणवकाक्रीड ८ अक्षर

–⏑⏑––⏑⏑–

आदिगतं तुर्यगतं

पञ्चमकं चान्त्यगतम्।

स्याद्गुरु चेत्संकथितं

माणवकाक्रीडमिदम्॥ १२॥

### नगस्वरूपिणी ८ अक्षरा

⏑–⏑–⏑–⏑–,

द्वितुर्यषष्ठमष्टमं

गुरु प्रयोजितं यदा।

तदा निवेदयन्ति तां

बुधा नगस्वरूपिणीम्॥ १३॥

### विद्युन्माला ८ अक्षरा

सर्वे वर्णा दीर्घा यस्यां
विश्रामः स्याद्वेदैर्वेदैः।
विद्वद्वृन्दैर्वीणावाणि
व्याख्याता सा विद्युन्माला॥ १४॥

### चम्पकमाला १० अक्षरा

–◡◡––,–◡◡––

तन्वि गुरु स्यादाद्यचतुर्थं
पञ्चमषष्ठं चान्त्यमुपान्त्यम्।
इन्द्रियबाणैर्यत्र विरामः
सा कथनीया चम्पकमाला॥ १५॥

### मणिमध्य ९ अक्षरा

–◡◡––,–◡◡–

चम्पकमाला यत्र भवेद्
अन्त्यविहीना प्रेमनिधे।
चन्दसि दक्षा ये कवयस्
तन्मणिमध्यं ते ब्रुवते॥ १६॥

### हंसी १० अक्षरा

––––,⏑⏑⏑⏑⏑–

मन्दाक्रान्तान्त्ययतिरहिता

सालंकारे यदि भवति या।

सा विद्वद्भिर्ध्रुवमभिहिता

ज्ञेया हंसी कमलवदने॥ १७॥

### शालिनी ११ अक्षरा

–––––⏑–,–⏑––

ह्रस्वो वर्णौ जायते यत्र षष्ठः

कम्बुग्रीवे तद्वदेवाष्टमान्त्यः।

विश्रान्तिः स्यात्तन्वि वेदैस्तुरङ्गैस्

तां भाषन्ते शालिनीं चान्दसीयाः॥ १८॥

### दोधक ११ अक्षरा

–⏑⏑–⏑⏑–⏑⏑––,

आद्यचतुर्थमहीननितम्बे

सप्तमकं दशमं च तथान्त्यम्।

यत्र गुरु प्रकटस्मरसारे

तत्कथितं ननु दोधकवृत्तम्॥ १९॥

### इन्द्रवज्रा ११ अक्षरा

––⏑––⏑⏑–⏑––,

यस्यास्त्रिषड्सप्तममक्षरं स्याद्

ह्रस्वं सुजङ्घे नवमं च तद्वत्।

गत्या विलज्जीकृतहंसकान्ते

तामिन्द्रवज्रां ब्रुवते कवीन्द्राः॥ २०॥

### उपेन्द्रवज्रा ११ अक्षरा

⏑–⏑––⏑⏑–⏑––,

यदीन्द्रवज्राचरणेषु पूर्वे

भवन्ति वर्णा लघवः सुवर्णे।

अमन्दमाद्यन्मदने तदानीम्

उपेन्द्रवज्रा कथिता कवीन्द्रैः॥ २१॥

### उपजाति ११ अक्षरा

––⏑––⏑⏑–⏑––, इन्द्रवज्रा

यत्र द्वयोरप्यनयोस्तु पादा

⏑–⏑––⏑⏑–⏑––, उपेन्द्रवज्रा

भवन्ति सीमन्तिनि चन्द्रकान्ते।

––⏑––⏑⏑–⏑––, इन्द्रवज्रा

विद्वद्भिराद्यैः परिकीर्तिता सा

⏑–⏑––⏑⏑–⏑––, उपेन्द्रवज्रा

प्रयुज्यतामित्युपजातिरेषा॥ २२॥

### आख्यानकी ११ अक्षरा

−−⏑−−⏑⏑−⏑−−,

आख्यानकी सा प्रकटीकृतार्थे

⏑−⏑−−⏑⏑−⏑−−,

यदीन्द्रवज्राचरणः पुरस्तात्।

⏑−⏑−−⏑⏑−⏑−−,

उपेन्द्रवज्रा चरणास्त्रयो ऽन्ये

⏑−⏑−−⏑⏑−⏑−−,

मनीषिणोक्ता विपरीतपूर्वा॥ २३॥

### रथोद्धता ११ अक्षरा

−⏑−⏑⏑⏑−⏑−⏑−,

आद्यमक्षरमतस्तृतीयकं

सप्तमं च नवमं तथान्तिमम्।

दीर्घमिन्दुसखि यत्र जायते

तां वदन्ति कवयो रथोद्धताम्॥ २४॥

### स्वागता ११ अक्षरा

−⏑−⏑⏑⏑−⏑⏑−−,

अक्षरं च नवमं दशमं च

व्यत्ययाद्भवति यत्र विनीते।

प्राक्तनैः सुनयने यदि सैव

स्वागतेति कविभिः कथितासौ॥ २५॥

### वैश्वदेवी १२ अक्षरा

––––– ,–⏑––⏑––

ह्रस्वो वर्णः स्यात्सप्तमो यत्र बाले
तद्वद्बिम्बोष्ठि न्यस्त एकादशाद्यः।
बाणैर्विश्रामस्तत्र चेद्वा तुरंगैर्
नाम्ना निर्दिष्टा सुभ्रु सा वैश्वदेवी॥ २६॥

### तोटक १२ अक्षरा

⏑⏑–⏑⏑–⏑⏑–⏑⏑–,

सतृतीयकषष्ठमनङ्गरते
नवमं विरतिप्रभवं गुरु चेत्।
घनपीनपयोधरभारनते
ननु तोटकवृत्तमिदं कथितम्॥ २७॥

### भुजङ्गप्रयात १२ अक्षरा

⏑––⏑––⏑––⏑––,

यदाद्यं चतुर्थं तथा सप्तमं स्यात्
तथैवाक्षरं ह्रस्वमेकादशाद्यम्।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम्॥ २८॥

### द्रुतविलम्बित १२ अक्षरा

⏑⏑⏑–⏑⏑–⏑⏑–⏑–,

अयि कृशोदरि यत्र चतुर्थकं
गुरु च सप्तमकं दशमं तथा।
विरतिगं च तथैव सुमध्यमे
द्रुतविलम्बितमित्युपदिश्यते॥ २९॥

### प्रमिताक्षरा १२ अक्षरा

⏑⏑–⏑–⏑⏑⏑–⏑⏑–,

यदि तोटकस्य गुरु पञ्चमकं
विहितं विलासिनि तदक्षरकं।
रससंख्यकं गुरु न चेदबले
प्रमिताक्षरेति कविभिः कथिता॥ ३०॥

### हरिणीप्लुता ११ १२ अक्षरा

⏑⏑–⏑⏑–⏑⏑–⏑–¦¦ ⏑⏑⏑–⏑⏑–⏑⏑–⏑–

प्रथमाक्षरमाद्यतृतीययोर्द्रुतविलम्बितकस्य हि पादयोः।

⏑⏑–⏑⏑–⏑⏑–⏑–¦¦⏑⏑⏑–⏑⏑–⏑⏑–⏑–

यदि नास्ति तदा कमलेक्षणे भवति सुन्दरि सा हरिणीप्लुता॥ ३१॥

### वंशस्थविल  १२ अक्षरा

⏑–⏑––⏑⏑–⏑–⏑–,

उपेन्द्रवज्रा चरणेषु सन्ति चेद्
उपान्त्यवर्णा लघवः परे कृताः।
मदोल्लसद्भ्रूजितकामकार्मुके
वदन्ति वंशस्थविलं बुधास्तदा॥ ३२॥

### इन्द्रवंशा  १२ अक्षरा

––⏑––⏑⏑–⏑–⏑–,

यस्यामशोकाङ्कुरपाणिपल्लवे
वंशस्थपादा गुरुपूर्ववर्णकाः।
तारुण्यहेलारतिरङ्गलालसे
तामिन्द्रवंशां कवयः प्रचक्षते॥ ३३॥

### प्रभावती  १३ अक्षरा

––⏑–,⏑⏑⏑⏑–⏑–⏑–

यस्यां प्रिये प्रथमकमक्षरद्वयं
तुर्यं तथा गुरु नवमं दशान्तिमम्।
सान्त्यं भवेद्यतिरपि चेद्युगग्रहैः
सालक्ष्यताममृतरुते प्रभावती॥ ३४॥

### प्रहर्षिणी १३ अक्षरा

–––,⏑⏑⏑⏑–⏑–⏑––

आद्यं चेत्त्रितयमथाष्टमं नवान्त्यं
द्वावन्त्यौ गुरुविरतौ सुभाषिते स्यात्।
विश्रामो भवति महेशनेत्रदिग्भिर्
विज्ञेया ननु सुदति प्रहर्षिणी सा॥ ३५॥

### वसन्ततिलक १४ अक्षरा

––⏑–⏑⏑⏑–,⏑⏑–⏑––

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं
यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम्।
अष्टाभिरिन्दुवदने विरतिश्च षड्भिः
कान्ते वसन्ततिलकं किल तं वदन्ति॥ ३६॥

### मालिनी १५ अक्षरा

⏑⏑⏑⏑⏑⏑––,–⏑––⏑––

प्रथममगुरुषट्कं विद्यते यत्र कान्ते
तदनु च दशमं चेदक्षरं द्वादशान्त्यम्।
गिरिभिरथ तुरङ्गैर्यत्र कान्ते विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा॥ ३७॥

### हरिणी १७ अक्षरा

⏑⏑⏑⏑⏑–,––––,⏑–⏑⏑–⏑–

सुमुखि लघवः पञ्च प्राच्यास्ततो दशमान्तिमः
तदनु ललितालापे वर्णौ तृतीयचतुर्थकौ।
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्कनकप्रभे
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा॥ ३८॥

### शिखरिणी १७ अक्षरा

⏑–––––,⏑⏑⏑⏑⏑––⏑⏑⏑–

यदि प्राच्यो ह्रस्वः कलितकमले पञ्च गुरवः
ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि लघवः।
त्रयो ऽन्ये चोपान्त्याः सुतनुजघने भोगसुभगे
रसैरीशैर्यस्यां भवति विरतिः सा शिखरिणी॥ ३९॥

### पृथ्वी १७ अक्षरा

⏑–⏑⏑⏑–⏑–,⏑⏑⏑–⏑––⏑–

द्वितीयमलिकुन्तले गुरु षडष्टमद्वादशं
चतुर्दशमथ प्रिये गुरु गभीरनाभिह्रदे।
सपञ्चदशमान्तिमं तदनु यत्र कान्ते यतिर्
गिरीन्द्रफणभृत्कुलैर्भवति सुभ्रु पृथ्वीति सा॥ ४०॥

### मन्दाक्रान्ता  १७ अक्षरा

––––,⏑⏑⏑⏑⏑–,–⏑––⏑––

चत्वारः प्राक्सुतनु गुरवो द्वौ दशौकादशौ चेन्
मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ।
तद्वच्चान्त्यौ युगरसहयैर्यच्च कान्ते विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि तां संगिरन्ते॥ ४१॥

### शार्दूलविक्रीडित  १९ अक्षरा

–––⏑⏑–⏑–⏑⏑⏑–,––⏑––⏑–

आद्यं यत्र गुरु त्रयं प्रियतमे षष्ठं ततश्चाष्टमं
सन्त्येकादशतस्त्रयस्तदनु चेदष्टादशाद्यान्तिमाः।
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितं॥ ४२॥

### स्रग्धरा  २१ अक्षरा

––––⏑––,⏑⏑⏑⏑⏑⏑–,–⏑––⏑––

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमो ऽपि
द्वौ तद्वत्षोडशाद्यौ मृगमदतिलके षोडशान्त्यौ तथान्त्यौ।
रम्भास्तम्भोरुकान्ते मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो
बाले वन्द्यैः कवीन्द्रैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा॥ ४३॥

इति श्रीकालिदासविरचितः श्रुतबोधः संपूर्णः